International Journal of Sanskrit Research 2017; 3(4): 97-103

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 97-103
© 2017 IJSR
www.anantaajournal.com
Received: 20-05-2017
Accepted: 21-06-2017

**श्री प्रकाश: गोगिकार:**
वरंगल् तेलंगाणाराज्य:

Correspondence
**श्री प्रकाश: गोगिकार:**
वरंगल् तेलंगाणाराज्य:

# सुषुप्तिवृत्तम् एकमनुशीलनम्

**श्री प्रकाश: गोगिकार:**

कलाप्रपूर्ण: कुलपति बिरुदाङ्कितेन श्रीमता तिरुमल गुदिमेल्ल वरदाचार्य महोदयेन विरचितं त्रिसर्गात्मकं लघुकाव्यं सुषुप्तिवृत्तम्। विद्याव्यासङ्गे विशिष्य संस्कृतकलाशालानां पर्यवेक्षाधिकारितय स्थितोऽपि श्रीवरदाचार्य: भारतदेशदास्य श्रुङ्खला विच्छेदनार्थं प्रयतितवत्सु एकतमोऽऽसीत्। अयं महोदय: ३-८-१८९२ हूणाब्दौ जन्म लेभिरे।
श्रीमान् वरदाचार्याणां संस्कृत ग्रन्थरचना भहुमुखप्रज्ञायुता एतेषां रचना: स्वतन्त्रकवितारूपा:, विमर्शात्मका:, अनुवादरूपा: एवं त्रिभिर्विधै: विश्लेषणार्हा:। तेषु प्रथमवर्गे वर्तते स्वतन्त्रकवितारचना:
तिस्र: सन्ति ता: सुषुप्तिवृत्तम्, सत्यविजयम्,प्रास्ताविककदम्ब:। विमर्शात्मकरचना भाषाशास्त्रसङ्ग्रह:, अनुवादात्मकरचना: नव शतकानि वेमनशतकं, सुमतिशतकं, दाशरथिशतकं, कृष्णशतकं आन्ध्रनायकशतकं, नारसिंहशतकं, श्रीकालहस्तीश्वरशतकं, भास्करशतकं, गायत्रिनीतिगीतावलि: सन्ति शतकग्रन्थानेतान् आन्ध्रभाषात: संस्कृतभाषायां अनुवादिता:। एते अनुवादिता: शतकग्रन्था:
नाम्ना एव अनुवादग्रन्था: किन्तु स्वतन्त्ररचना इवबासन्ते।

**सुषुप्तिवृत्तम् -** देशभक्तिसम्पन्ना: भारतमातु: प्रियसूनव: एते स्वातन्त्र्योद्यमे प्रविष्टा:। इतर स्वातन्त्र्योद्यमकारिभि: विभिन्न पद्दतिमाश्रित्य स्वयं आशावादिन: दृढदैवभक्तिविभवा अपि मानव प्रयत्नेन साकं भगवत्साहाय्यं अर्थयन्त: सुषुप्तौ एकं स्वप्नं अनुभूतवन्त: तत्र भगवन्तंददृशु: “सुषुप्तौ वृत्तं आधारीकृत्य सुषुप्तिवृत्तमिति मधुरं काव्यं ससृजु:।
तत्र प्रथमत: एकां ज्योतिं भक्तिपारवश्ये दृष्ट्वा तां संस्तुत्य क्रमश: सैव पुरुषोत्तम इति ज्ञात्वा भक्तिपारवश्येन भगवन्नुतिं, स्वापराधक्षमां,

स्वोपेक्षां चोक्त्वा, दोषसहितमपि स्वां स्तुतिं, प्रार्थनां स्वीकुरु इति भगवन्तं स्तुवन्त: भगवत: सर्वज्ञत्व, सर्वशक्तिमत्व, सर्वान्तर्यामित्वादि सकलकल्याणगुणान् आचार्या: प्रस्तुवन्ति।

**कथावस्तु विवरणा - भारतदेशप्रशस्ति: - प्रथमसर्ग:**
कुरुपाण्डव वंशकर्तु: भरतस्य नाम्ना प्रसिद्ध: देश: सहृदयानां हृदयमिव विशाल:। यथा परात्पर: हृदि जागीर्त तथैव प्रपञ्चे भारते एव जगन्नाथ: दशवारान् सम्भवति। लक्ष्मीपार्वत्यो: यत्र
जनि: तावेव समुद्रहिमालयौ देशस्य दक्षिणोत्तरावधीजातौ। दुर्जनेभ्य: हिमालय: उत्तङ्गशृङ्जै: रक्षति।

यस्याभ्रचुम्बीनि न शक्नुवन्ति
शृङ्गाणि मर्त्या: सशरीरमाप्तुम्।
हिमालयो रक्षति वत्स: एष:
यमुत्तरस्यां दिशि दुर्जनेभ्य:॥१

देशपुत्री: सिन्धू: परिणीय समुद्र: जामातृतां गत: रक्षां विधत्ते। अपथ्यसेवीरुजाभि: इव उच्चैश्शिरा: नीचनगाश्र्य: अन्यै: मर्मणि भिद्यते। गौरीतपस्या पूततरं प्राप्त: हिमालय: सर्वोन्न्तत्वं वितनोति विधाता रक्तनाडी: नदी: विधाय वृष्ट्यम्बुनिघ्नत्वमपि व्यधत्त।
सविता रश्मिभि: धरण्या: संक्षेपमादर्शयते।भूगो: हिमाद्रिवत्स: रत्नौषौधिक्षीरं पिबति। आपगा: भुव: रत्नानि गृहीत्वा: पते: अब्धे: समर्प्य तं रत्नाकरमकुर्वन् हविषो समर्पणात् लोकान्तरसख्यमपि वर्तते किं अन्यदेशै:।सितासितमनुष्यै: कैरवेन्दीवरै: ह्रद इव भाति।
रुषिभि: श्रुतिशास्त्रै: मोक्षौपयिकानि विधदते। वेदै: कर्मभूमि:
वेदान्तेन ज्ञानभूमि: राजते। आस्तिक नास्तिकै: अनेकमतैश्च विश्वविद्यालय: विराजते।

संस्कृतभाषया आर्षमतेन अतुलां प्रतिष्टां चकार।

अनादिभूता: श्रुतयश्च यत्र
कल्पेषु दृष्टा रुषिभिर्महद्भि:।
शास्त्राणि चापि प्रथितानि सन्ति
त्रिवर्गमोक्षौपयिकानि विज्ञै:॥२

**भारतस्य अन्यादृशीरीति:।** य: सर्वसंस्कारमहत्तम: स: यज्ञसूत्रैकफल: मह: अस्ति गुरुशुश्रूषया आप्तविद्य: अपि भोगतृष्ण: गुरुतो विद्यां धनेन क्रीणाति। वेदवेदाङ्गाध्ययनं सहस्रेषु एक: करोति। गृहस्ताश्रम: निजोपभोगायैव भवति। वानप्रस्थं प्रविलुप्तम्। तुर्य: ब्रह्मश्रित: विरल: अस्ति। श्रुतपारगा: शरीरधृत्यै भृतिमीप्तव: जायन्ते। पुराग्रजा: परेणाचरणेन युक्ता: जानपदग्रजाता: भवन्ति। विप्रधर्मा विपुला:। राजधर्मा:विलुप्ता:। वैश्य: धनार्थी कृषिकर्मजहौ। विशां प्राक् ये धर्मा: ते न चरन्तितान्। विशां कुसीदं प्रथमावृत्ति: अस्ति। सर्वे स्वधर्मान् परित्यज्य परकीयधर्मान् समाश्रयन्ते। सर्वे स्वधर्मचर्चाच्युतिं एत्य धनार्थिन: स्वार्थपरा च सन्ति। नृपा: अनिष्टकामान् उपसान्त्वयन्ति। वित्तदिभिस्तोषिता: प्रजा: भूपा: अनुरञ्जयन्ति। सर्वेषां कर्मणां यन्त्रोपकृति: भवति। यन्त्रं जनान् स्वगृहेषु बन्दीकरोति। स्ववृत्तिविच्छेदवशात् ग्रामीणा: अङ्गै: गतौजोभिरिव भवन्ति। ग्रामे क्षुत्क्षोभनैराश्यविषादभावा: पृथुलं लभन्ते। अस्या: प्रतीकारविधौ विपत्ते: देव्याऽवशक्ति: न नरस्य। एवं शोकेन अन्तस्तमसा लुप्ताखिलशेमुषीक: परं ज्योतिष एव रक्षां मत्वा अर्धरात्रात् निद्रां जगाम।

शोकेन चान्तस्तमसा बहिश्च
नैशेन लुप्ताखिलशेमुषीक:।
मत्वा परज्योतिष एव रक्षां
जगाम निद्रां परतोऽर्धरात्रात्॥३

**द्वितीय: सर्ग:- परंज्योतिदर्शनम् -** मया यथा प्रार्थित: देवं तादृक् ज्योतिरदर्शि। रसवत् काव्यमिव ज्योति: सूर्यचन्द्रमसो: कान्तिं धृत्वा अन्धंतम: अपाकरोति अमृतधारा: वर्षति तत् ज्योति: न भोतिकं ब्रह्मतेज: इति क्रमेण ज्ञातम्। मया स्वदेशरक्षाय प्रार्थित ज्योतिरेव इति विज्ञाय सन्तोषमाप्य तस्मिन्नेव मन: निक्षिप्य महायोगिभि: लभ्यं परंज्योति: प्राप्तुं आरब्धवान्। तत: पुरुषोत्तम एव इतिज्ञातवान् प्रनष्टराज्यो राजा पुन: प्राप्तराज्य: कथं तुष्यति तथैवाहमभवम्। “उत्तिष्ट! वत्स!” इति प्रभोर्वाक्यं निशम्य मुक्तोहमिति प्रबुध्य एवं तं प्रार्थितवान्। तवाज्ञां विना सूर्यादीनां चलनं अपि न भवति। पञ्चभूतानीति मृषावाद: तव दर्शनस्य विरलात् सर्वे त्वां न जानन्ति। सृष्टिस्थिति प्रलयकारको भवान् सर्वं जगत् करोषि, पोषयसि,नाशयसि च। दुष्टानां दुर्गुणवारणाय त्वं तेषां दु:खं कल्पयसि। यथा वैद्य: रुग्णस्य चिकित्सार्थे अवयव खण्डनं करोति तथा करोषि।

दुष्टात्मनो दौष्ट्यमापस्य भद्रं
विधित्सुरुत्पादयसेऽस्य दु:खम्।
रुग्णस्य जन्तो: कुशलं चिकीर्षु:
वैद्यस्तदङ्गानि निकृन्ततीह॥४

नोचेत् सर्वंशारीरं विनश्यति खलु। प्रिया भार्यास्वपति: सर्वदा तस्या: समीपे वर्तते चेत् तस्मिन् अनुरक्ता न भवति। तथैव सन्निधि: सर्वदा प्रत्यक्षा भवति त्वय्यपि अनुरक्ति: न भवति । पितु: पुत्रे यथा प्रेम तथा पुत्रस्य पितरि न भवति। तथैव तव अस्मासु यथा अनुराग: तथा त्वयि अस्माकं नास्ति।
भक्तप्रिय! दोषसहिता स्तुतिरपि एषा तव प्रीतिमेव उत्पादयति। यथा बालानां लालनपदानि पितु: प्रीतिमुत्पादयन्ति तथा। इति कवि: देव देवं एवं स्तुतिं करोति।

प्रीणातु दोषैस्सहिताऽपि मेऽसौ
भक्तस्य भ्क्त प्रियसन्नुतिस्त्वम्।
अवन्ति तातं शिशुजल्पितानि
परं वचोभ्य: सुखवेर्हि लोके॥५

**तृतीय सर्ग: - भगवत: वचनानि।**
दयालु: भगवान् कवे: उक्ती: श्रुत्व शुचिस्मितावर्धित दन्तकान्ति: मधुरस्वरेण वाचं उवाच। स्वदेशदास्यं प्रविचिन्त्यखिन्न: एवं मम प्रपन्न:। तव मत्परोक्ति: प्रीतं मां प्रीततरं चकार निजदेशदु:खै: महद्भि: महदागत: त्वंधन्य:
विपरीतभूपा: न् उपेक्षणीया:। तव देश दु:स्थिते: प्रतीकारविधौ तवोपदेष्टा: मत्त: परो नास्ति। स्वकीये अनादरं द्वेषमपि बद्दराग:, परप्रताराय खलस्य सृष्टि:, कुत्सिततर्कधीर:, दयाविहीन:,
निजकर्मभोजी नीचै: स्थितावत्र जन:मूले अस्ति। स्वा: विहित क्रिया: वर्णाभजन्त:,भर्तार: आत्मपत्नी: नन्दन्ति। अनन्यगमित्वं उपेयिवद्भि: निषेव्यमाणा: क्रिया: प्रसीदन्ति: ध्रुवं ध्रुवं युद्दं अपूर्वं क्षयं नातिचिरेण लोकक्षयं कुर्यात्। इत्थं वदन्तं जगतांपतिं कोपि कोलाहल: चकर्ष। एवं जनस्य गीति: दिदेश। जय जय इष्टनिभर्हण! भद्रायन:पातु स देव देव:। एवं सुजनस्य गीति: उद्गीयमानाभूत्। कवि:एवं भावयति पुरुषोत्तम: न दद्रुशे मया तस्य वाक् न श्रुता, इति परमपुरुषे मन्दोत्कण्ठ: पौरमुख्यान् गायत: मम देव देवस्य प्रीतिरस्तु इति।

देव्या ललितया वाचा ययात्राऽहं प्रवर्तित:।
तस्याश्च धीमतां तुष्ट्या कृते:स्यात्कृतिता च मे॥६

इति श्लोकाभ्यां कवि: स्वसुषुप्तिवृत्तं समापितवान्।

**रसचर्चा -** सुषुप्तिवृत्ते द्वितीयसर्गे स्वातन्त्र्य समुपार्जनोत्सुकस्य देशभक्ति परिपूर्णस्य श्रीमतो वरदाचार्यस्य पुन: पुन: भगवद्गुण
कृपाविष्करण रूपाया: भक्ते: आविष्कृतो अपि भारतदेशे स्थिता तस्या देशभक्ति: एतत् काव्यस्य निर्माणे बीज अभूदिति वक्तुं शक्यते। मनसि यादृशी

भावना वर्तते सैव स्वप्नरूपेण दर्शनपथं यातीति अस्माकं अनुभव:। प्राय: "निशीथावसान समये स्वप्ना: अवितथफला: भवन्तीति बाणभट्ट वचनानुसारेण अस्य काव्यकर्तु:
स्वप्नोऽयं प्रात:कालिक: स्यात् अन्यथा तस्य भारतस्वातन्त्र्यरूपा इच्छा न सफला भवतीति ज्ञेयम्।
अत्र काव्ये स्थित: प्रधान रस: देशभक्ति:। "श्रृङ्गार हास्य करुण..इत्युक्तेषु नवरसेषु भक्ते: अप्रवेशेऽपि श्रीकृष्णभक्ति संप्रदायस्थै: तस्या: भक्ते: रसत्वेनाङ्गीकारात् अत्र स्थितेषु गुरु, दैव, देशभक्तिरूपेषु त्रिषु रसेषु इमं देशभक्ति: तृतीयास्मादेव।
अत्र भक्तिरसे देशविषयके, देश: आलम्बन विभाव: स्वातन्त्र्य समुपार्जनार्थं कृता: उद्यमा: उद्दीपनविभाव:, मध्ये मध्ये आयाता: विघ्ना: तेषां जयश्च सञ्चारिविभावा:। यत्र रस: निष्पद्यते स: पुरुष: अयं काव्यकर्ताऽपि आलम्बनविभाव: भवति।
स्थायिभावस्य देशेस्थितं अपूर्वं प्रेमा। रसोचितसामाग्री त्रिसर्गात्मकोऽत्र काव्ये मुहुर्मुहु: दृश्यन्ते। अङ्गरसस्य भगवत्
विषयक भक्ते: प्रदर्शका: उपमालङ्कारा: कालिदासस्य उपमालङ्कारस्य संवाद इव दृश्यन्ते। यत्र कुत्रापि परमात्मतत्वं प्रकाशनसन्दर्भे औपनिषद:भावा: दृष्टिगोचरापि भवन्ति। काव्यरचना च काव् अनतिदुर्बोधा,सरलपदबन्धुरा,सालंकारा सती काव्यत्व माविष्करोति कवेरस्य प्रयत्नस्य।

**विविधालङ्कार प्रयोग: - उपमालङ्कार:।**

कुरुपाण्डवानां वंशस्य कुत: कुत: भरतस्य नाम्ना भुव: हृदयायमान: महात्मन: मानसवद्विःशाल: देश: प्रतिष्ट:।

देश:प्रसिद्धो भरतस्य नाम्ना
वंशस्य कर्तु: कुरुपाण्डवानाम्।
महात्मनो मानसवद्विशालो
भुवोऽस्ति मध्ये हृदयायमान:॥७

अत्र उपमेय: भरतदेश: उपमान: महात्मनोमानस: विशालत्वं समानधर्म: अस्ति इति उपमालाङ्कार: भवति।
भारतदेश: स्पृहनीय सम्पत् अन्यादृशीं रीतिं भूकम्पत: नष्टपुराणभूति: प्रक्रान्त निर्माण प्रदेश: इव बिभर्ति:।

अयं स देश: स्पृहणीयसम्पत्
अन्यादृशीमद्य बिभर्ति रीतिम्।
भूक्म्पतो नष्टपुराणभूति:
प्रक्रान्तनिर्माण इव् प्रदेश:॥८

अत्र अन्यादृशी रीति: उपमेय: प्रदेश: उपमानभूत: प्रक्रान्त निर्माणत्वं साधारण धर्म: इव उपमेय वाचक:।
जगत् अभासमाल्या अपूर्वां शोभां विलिख्य शिल्पी अपूर्व वर्णेन पुराणचित्रं नवत्वं आपादयतीव उदपीपदद्यत्।

जगत्वभासामलयाविलिप्य
शोभामपूर्वामुदपीपदद्यत्।
अपूर्ववर्णेनपुराणचित्रं
नवत्वमापादयितेव शिल्पी॥९

अत्र जगत: शोभा उपमेयभूत: नवत्वं आपन्नं पुराणचित्रं उपमानभूतं अपूर्वशोभा साधारण धर्म:।
वत्से उत्तिष्ट इति अभ्रस्तनितं गम्भीरं वाक्यं निशम्य उत्थाय विधात्राभिहित: प्रसन्नोऽस्मि।

उत्तिष्ट वत्सेति निशम्य वाक्यं
गम्भीरमभ्रस्तनितं यथाऽहम्।
उत्थाय तेनाभिहितो विधात्रा
वत्स प्रसन्नोऽस्मि विभुशवेति॥१०

अत्र गम्भीरं वाक्यं उपमेयभूतं अभ्रस्तनितं उपमान भूतं गम्भीरध्वनि: समान धर्म:।

मद्दर्शने दर्शितभक्तिचेष्ट: शिलासु पारवश्यं जनयन् बुध: बोधविधौ यथा प्रवृत्त: तथा सच्चेतनानां कृतोपकार: अस्ति।

मद्दर्शने दर्शितभक्तिचेष्ट:
त्वत्पारवश्यं जनयन् शिलासु।
कृतोपकारोऽसि सच्चेतनानां
बुधो यथा बोधविधौ प्रवृत्त:॥११

अत्र शिलासु पारवश्यं जननं उपमेयभूतं बुधे बोधविधौ प्रवृत्ति: उपमानभूत: पारवश्यं समानधर्म:।
अपूर्वं युद्धं लोके नातिचरेण क्षयं कुर्यात् सुतभुक् यन्त्रं यथा
प्रशान्तं तथा प्रलयेन प्रशान्तं भवति।

ध्रुवं ध्रुवं युद्धमपूर्वमेष्यत्
कुर्यात्क्षयं नातिचरेण लोके।
यत्राश्रयस्य प्रलयेन नूनं यन्त्रं
प्रशान्तं सुतभुग्यथा स्यात्॥१२

अत्र प्रलय: उपमेयभूत: यन्त्रं उपमानभूतं प्रशान्तता समानधर्म:।

**खण्डश्लेषालङ्कार्:।**

नम: कपटयाचित्रे ध्रुत वामन मूर्तये।
पुरुषोत्तम भूताय बलिदर्प विदारिणे॥१३

अत्र कपटयाचित्रे वामन मूर्तये पुरुषोत्तम भूताय बलिदर्प विदारिणे नम: इति वामनावतार विष्णो: प्रार्थना कृता अपि तु एक: वामनशरीरेण कपटयाचाय बलिन: दर्पविदारिणे पुरुषोत्तम नम: इति राज्ञ: प्रार्थना श्लेषतया ज्ञायते।

**दीपकालङ्कार:**
स्वबाल्ये इष्टिं संत्रातुं पितरं, पितु: वच: पालयितुं प्रजा:, प्रजा: समाराधयितुं दारान् य: तत्याज तं भूपं प्रणमामि।

संत्रातु मिष्टिं पितरं स्वबाल्ये
पितुर्वच: पालयितुं प्रजाश्च।
प्रजास्समाराधयितुं च् दारान्
तत्याज यस्तं प्रणमामि भूपम्॥१४

अत्र प्रथमत: पितरं तत: प्रजा: तत: दारान् तत्याज इति वर्णयन् एकदा पितरं तत: पितुर्वचन पालनाय प्रजा: तत: प्रजा: आराधयितुं दारान् तत्याज इति प्रस्तुताप्रस्तुत विषया: तुल्यत्वं प्रतिपादनात् दीपकालङ्कार:।
लोकस्य पाप प्रशमाय विष्णो: शिवस्य धर्मपत्न्यौ यत्र सेतु हिमालययो: आपतु: तावेव भारतदेशस्य दक्षिणोत्तर रक्षण मानदण्डौ जातौ।

लोकस्य तापप्रशमाय तापं
विष्णोश्शिवस्यापि च धर्मपत्न्यौ।
यत्रापतु: सेतुहिमालयौ तौ
यस्यावधिर्दक्षिण उत्तरश्च्॥१५

अत्र भारतदेशस्य सीमा रक्षकौ समुद्र हिमालयौ प्रस्तुतविषय: अप्रस्तुतेन लक्ष्मी पार्वती जन्मस्तल वर्णनद्वारा दीपकालङ्कार:।

**अतिशयोक्त्यलङ्कार:।**
मर्त्या: अभ्रचुम्बिनि श्रुङ्गानि सशरीरं आप्तुं न शक्नुवन्ति। उत्तरस्यांदिशिदुर्जनेभ्य:हिमालय:रक्षति।

यस्याभ्रचुम्बिनि न शक्नुवन्ति
श्रुङ्गाणि मर्त्या: सशरीरमाप्तुम्।
हिमालयो रक्षति वत्स एष:
यमुत्तरस्यां दिशि दुर्जनेभ्य:॥१६

अत्र हिमालय श्रुङ्गाणि अभ्रचुम्भिनि इति असम्भवत् वस्तु वर्णन द्वारा अतिशयोक्ति प्रदर्शिता।

**उत्प्रेक्षालङ्कार:।**

विश्वम्भराय हृदयस्वरूपाय जगन्नथ निवासभू:। परात्पर: काये
अङ्गेषु बहुषु स्थितेषु अपि हृत् एव जागर्ति।

नूनं जगन्नाथनिवासभूर्यो
विश्वम्भराया हृदयस्वरूप:।
अङ्गेषु काये बहुषु स्थितेषु
हृद्येव जागर्ति परात्परो हि॥१७

अत्र भारतदेश: श्री जगन्नाथ निवासभूमि इति प्रकृतं इति परात्परा हृत् जागर्तुरिति हेतुना उत्पेक्षित:।
यस्य आत्मजाता: सिन्धू: परिणीय तत् पतित्वं आपन्न: समुद्र: अन्यदिक्षु रक्षां विदत्ते। पुत्रात् जामातु: इयान् विशेष:।

यस्यात्मजाता: परिणीय सिन्धू:
तज्जानिरित्यात्पयशास्समुद्र:।
रक्षां विधत्ते न तथाऽन्यदिक्षु
त्राद्धि जामातुरियान्विशेष:॥१८

अत्र समुद्र: देशं रक्षति इति सामान्य विशय: जामातुरिव रक्षति इति उत्प्रेक्षालङ्कार:।

**रूपकालङ्कार:।**

अस्य विषयस्य दिष्टं चिरेण परेषां दास्यं आसीत्। जरय देहपटुत्वे क्षीणे रुजाक्रिमीणां वश्यं आयाति।

तदस्य दिष्टं विषयस्य दास्यं
आसीच्चिरेण क्रमश: परेषाम्।
क्षीणे पटुत्वे जरया हि देहं
वश्यत्वमायाति रुजाक्रिमीणाम्॥१९

अत्र विषयस्य दिष्टं यथा दास्यं भवति इति विषय्या: पटुत्वे क्षीणे देहस्य रुजाक्रमेण वस्यत्वं आयाति इति विषयस्य तादृप्य रञ्जनात् रूपकालङ्कार:।

**अर्थान्तरन्यास:।**

काये अङ्गेषु बहुषु स्थितेषु अपि परात्पपर: हृदि एव जागर्ति।

अङ्गेषु काये बहुषु स्थितेषु
हृद्येव जागर्ति परात्परो हि॥२०

अत्र सर्वेषु अङ्गेषु जागरणं सामान्य विषय: हृदि एव जागर्ति
इति विशेषेन समर्थित:।
वित्तादिभि: तोषिता: सूरा: स्वार्थाविरुद्धं बहुधा उपकृत्य भूपा: स्वा: प्रजा: अनुरञ्जयन्ति। नृपस्य भूति: प्रजानुरागादेव भवति।

वित्तादिभिस्तोषितविज्ञशूरा:
स्वार्थाविरुद्धं बहुधोपकृत्य।
भूपा: प्रजा: स्वा अनुरञ्जयन्ति
जानुरागाद्धि नृपस्य भूति:॥२१

वित्तदिभि: तोषिता: सूरा: स्वार्थाविरुद्धं बहुधा उपकृत्य भूपा: स्वा: प्राजा: अनुरञ्जयन्ति। किं तु नृपस्य भूति: प्रजानुरागादेव भवति। अत्र राजान: प्रजा: अनुरञ्जयन्ति इति सामान्यविषय: नृपस्यभूति: प्रजानुरागात् इति विशेषांशेन समर्थित:।
नृपा: प्रजासु अविभेदवत्वं जिग्रन्ति। वैमत्य भीजानि वपन्ति बहूनां विजये नीति:भेद:।

नृपा यदात्मस्थिरताविलोपि
प्रजासु जिघ्रन्त्यविभेदवत्त्वम्।
वैमत्यबीजानि वपन्ति यत्र
भेदो हि नीतिर्विजये बहूनाम्॥२२

अत्र प्रजासु विभेवत्वं सामान्य विषय: बहूनां विजये नीति: भेद: इति विशेषांशेन समर्थित:।
नवं मनोज्ञं सर्गं चिकीर्षु: जीर्णलोकप्रलयं विधत्से। नवीन सौधं निर्मातुकाम: पुराण गेहं निपातयति हि।

सर्गं चिकीर्षुश्च नवं मनोज्ञं
त्वं जीर्णलोकप्रलयं विधत्से।
निर्मातुकामो हि नवीनसौधं
निपातयत्येव पुराण्गेहम्॥२३

अत्र नव सृष्टिं चिकीर्षु: प्रलयं उत्पादयति इति सामान्य विषय: नवीनसौधं निर्मातुकाम: पुराणगेहं निपातयति इति विशेषांशेन समर्थित:।

दुष्टात्मन: दौष्ट्यं अपास्य भद्रं विधित्सु: दु:खं कल्पयति यथा रुग्णस्य जन्तो: कुशलं चिकीर्षु: वैद्य: तदङ्गानि निकृन्तति।

दुष्टात्मनो दौष्ट्यमापस्य भद्रं
विधित्सुरुत्पादयसेऽस्य दु:खम्।
रुग्णस्य जन्तो: कुशलं चिकीर्षु:
वैद्यस्तदङ्गानि निकृन्ततीह॥२४

अत्र दौष्ट्यं अपनोदनाय दु:ख कल्पन रूपो सामान्य विषय: जन्तो: रुग्ण निवारणाय अङ्ग निकृन्तन रूपेण समर्थित:।

**सन्देहालङ्कार:।**

एष: स्वप्न: किं अस्ति इन्द्रजाल: किं माया वा मतिविभ्रम: वा इति परमात्मन: कृपाप्राप्त: परमार्थतृप्त: विकल्पयति।

स्वप्न: किमेषोऽस्ति किमिन्द्रजालो
माया भवेद्वा मतिविभ्रमो वा।
विकल्प्य चैवं परमार्थमाप्त:
कृपाप्रकर्षात्परमस्य पुंस:॥२५

**उपसंहार:।**

एवं प्रकारेण श्रीमन्त: वरदाचार्या: त्रिसर्गात्मके सुषुप्तिवृत्तं काव्ये भारतदेशस्य प्राचीन संस्कृति वैभवं आंग्लेयानां
दुष्टपालनं अपि च सुषुप्तौ आत्मना दर्शित: परंज्योति स्वरूप: परमेश्वर: अमुंदेशं रक्षतु इति भगवत: कल्याण गुणान् सहजतया प्रथमद्वितीय सर्गयो: वर्णितवान्। तृतीया सर्गे अमुंदेशं महात्मा गान्धी: कथं रक्षयति इति प्रतिपादितवान्। किञ्च मनव: यन्त्रस्य दास्य: यथा भविष्यति इति विवृत्य सुषुप्ते: उत्ताय राजमार्गे देशभ्क्ता: देशभक्ति गीतानि आलपन्तु इति काव्यं परिसमापयति। अत्र काव्ये शान्तरस पोषणमस्ति कवि: यथा सन्दर्भं विविधालङ्कारान् प्रयुयुञ्जे।

**सन्दर्भ:**


1. सुषुप्तिवृत्तम् प्रथमसर्ग: १२.
2. तदेव - तदेव २२.
3. तदेव - तदेव ६६.
4. तदेव - द्वितीयसर्ग:३०.
5. तदेव - तदेव ३९.
6. तदेव - तृतीयसर्ग: ४६.
7. तदेव - प्रथमसर्ग:०८.
8. तदेव - तदेव २६.
9. तदेव - द्वितीयसर्ग:०२.
10. तदेव - तदेव १४.
11. तदेव - तृतीयसर्ग: ०३.
12. तदेव - तदेव २९.
13. तदेव - प्रथमसर्ग: ०४.
14. तदेव - तदेव ०५.
15. तदेव - तदेव ११.
16. तदेव - तदेव १२.
17. तदेव - तदेव ०९.
18. तदेव - तदेव १३.
19. तदेव - तदेव ४९.
20. तदेव - तदेव २०.
21. तदेव - तदेव ५१.
22. तदेव - तदेव ५२.
23. तदेव - द्वितीयसर्ग: २८.
24. तदेव - तदेव ३०.
25. तदेव - तदेव १०.